दिनाङ्क : 11/07/2025

सायम् - 06:20

**आदौ-मुख्यवार्ता:**

· राष्ट्रियसुरक्षापरामर्शदः अजीत-डोबालः उक्तवान् यत् भारतं स्वदेशीयप्रौद्योगिक्याः उपयोगेन ऑपरेशन सिन्दूर् इत्यस्मिन् सफलतां प्राप्तुं समर्थम् अभवत्, सः छात्रान् आहूतवान् यत् ते कृत्रिमबुद्ध्या क्वाण्टम्-तन्त्रज्ञानेन च सप्तचत्वारिंशदुत्तर-द्विसहस्रतमवर्षपर्यन्तं विकसितराष्ट्र निर्माणं कुर्युः।

· सर्वकारेण देशस्य स्वच्छ-स्थायि-वस्तुवाहन-गतिशीलतायाः परिवर्तने सहायतार्थं विद्युत्-वाहनानां प्रोत्साहनार्थं योजना समारब्धा ।

· अन्ताराष्ट्रियमुद्राकोषेण, यु.पि.आई इति मुद्रा-विनिमय-प्रणाल्याः प्रशंसा कृता । उक्तं च अनया प्रणाल्या एव भारतं द्रुततर-मुद्राविनिमये विश्वनायकः अभवत् ।

· टेस्ट्-क्रिकेट्-क्रीडायां इंग्लैण्ड् दलेन सप्त क्रीडकानां हानौ त्रिपञ्चाशदधिक-त्रिशतं धवनांकाः समर्जिताः।

**अथ वार्ताः विस्तरेण**

**राष्ट्रियसुरक्षापरामर्शदः**

राष्ट्रियसुरक्षापरामर्शदः अजीत-डोबालः उक्तवान् यत् भारतं स्वदेशीयप्रौद्योगिक्याः उपयोगेन ऑपरेशन सिन्दूर् इत्यस्मिन् सफलतां प्राप्तुं समर्थम् अभवत्, तस्मात् अष्टाविंशतिनिमेशेषु एव पाकिस्तानपारं नव वा दश लक्ष्याणां प्रहारोऽपि साधितः। अद्य आईआईटी-मद्रास-इत्यस्य द्विषष्टि-तमे दीक्षान्तसमारोहे स्वभाषणे सः अवदत् यत् ऑपरेशन सिन्दूरस्य समये भारतीयसैन्यस्य पार्श्वे युद्धक्षेत्रे, ब्राह्मोस्, एकीकृतवायु-निर्देशन-प्रणाली, रडार् इत्याद्यः अत्याधुनिक-देशीयप्रौद्योगिक्यः आसन् ।

श्रीडोबालः अवदत् यत् एषः सहस्रवर्षेषु एकः सुसमयः वर्तते यद्धि देशस्य युवानः एतत् त्यक्तुं न शक्नुवन्ति। सः छात्रान् युवान् च आह्वानं कृतवान् यत् ते दुर्लभपृथिवीखनिजाः, कृत्रिमबुद्धिः, क्वाण्टम् कम्प्यूटिङ्ग् च इत्यादीनां संसाधनानाम्

उपयोगेन, सप्तचत्वारिंशदुत्तर-द्विसहस्रतमवर्षपर्यन्तं प्रौद्योगिकीनां आविष्कारं कृत्वा देशं विकसितराष्ट्रं प्रति उन्नयेयुः । सः प्रतिपादितवान् यत्, शिक्षा-कौशल-प्रौद्योगिक्या युक्तं विशाल-युवजन-संख्याकं भारतं अग्रिमेषु वर्षेषु देशस्य सर्वांगिक-वृद्धै योगदानं कर्तुं शक्नोति।

## कुमारस्वामी-ई ट्रक

बृहत्-उद्यममन्त्री एच.डी.कुमारस्वामी अद्य पीएम ई-ड्राइव योजनायाः अन्तर्गतं ई-ट्रक इति विद्युच्चालित-ट्रक्-यानानां प्रोत्साहनार्थं योजनां प्रारब्धवान्। सर्वकारेण देशस्य स्वच्छ-स्थायि-वस्तुवाहन-गतिशीलतायाः परिवर्तने सहायतार्थं विद्युत्-वाहनानां समर्थनं प्रथमवारं आरब्धम्। अस्मिन् अवसरे वदन् एच्.डी. कुमारस्वामी प्रोक्तवान् यत् दिल्लीनगरे पञ्जीकृतानां प्रायः एकशतोत्तर-सहस्रम् ई-ट्रक-यानानां कृते प्रोत्साहनं दातुम्, समर्पितं प्रावधानं कृतम् अस्ति, यत्र एकशतकोटिरूप्यकाणां व्ययः भवेत् ।

## अन्ताराष्ट्रियमुद्राकोषः

आय्.एम्.एफ् इति अन्ताराष्ट्रियमुद्राकोषेण युनिफाइड्-पेमेण्ट्स्-इण्टरफेस्-सिस्टम्, यु.पि.आय् इत्यस्य मुद्रा-विनिमय-प्रणाल्याः प्रशंसा कृता । उक्तं च अनया प्रणाल्या एव भारतं द्रुततर-मुद्राविनिमये विश्वनायकः अभवत् । "ग्रोइंग-रीटेल्-डिजिटल-पेमेण्ट्स्" इति शीर्षकोपेते अस्मिन् लेखे उक्तं यत्- यूपीआई-इत्यनेन भारते डिजिटल-मुद्राविनिमय-परिदृश्यं परिवर्तितम् अस्ति ।

## विरामः

संस्कृतवार्तायाः संस्करणमिदम् इदानीम् आकाशवाणीतः प्रसार्यते। सममेव अयं कार्यक्रमः आकाशवाण्याः www.newsonair.gov.in वेबसाइट इत्यत्र, अथ newsonair मोबाइल ऐप इत्यत्र अपि उपलब्धो भविष्यति।

## पीएम्-नियुक्तिः

प्रधानमन्त्री नरेन्द्र मोदी श्वः विडियो सम्मेलनद्वारा विभिन्नेषु सर्वकारीयविभागेषु संस्थासु च नवनियुक्तानां युवानां कृते एकपञ्चाशत्-सहस्राधिकानां नियुक्तिपत्रां वितरणं करिष्यति। सः अस्मिन् अवसरे नव-नियुक्तान् युवजनान् अपि सम्बोधयिष्यति। षोडशतम-उद्योग-सम्मेलनम् देशे सप्तचत्वारिंशत् स्थानेषु भविष्यति। केन्द्रसर्वकारस्य मन्त्रालयेषु, विभिन्न-विभागेषु च एताः नियुक्तयः भवन्ति।

## कांवड-यात्रा

श्रावणमासस्य कावडयात्रा अद्य समारब्धा ।

प्रातःकालादारभ्य बहुसंख्याकाः तीर्थयात्रिकाः गङ्गाजलं समानेतुम् उत्तराखण्डस्य हरिद्वारम्, ऋषिकेशम्, नीलकण्ठमहादेवम्, गंगोत्री धाम च प्रविशन्तः सन्ति। कावडयात्राम् अभिलक्ष्य सर्वकारेण प्रशासनेन च यात्रायाः सर्वाः पूर्वसिद्धताः कृताः सन्ति ।

## क्वाण्टम- मैटी::

अद्य इलेक्ट्रॉनिक्स तथा सूचना प्रौद्योगिकी मन्त्रालयः नवीदिल्लीनगरे ट्रांजिशनिंग टु क्वाण्टम साइबर रेडिनेस् (Transitioning to Quantum Cyber Readiness) इत्यनेन शीर्षकेण श्वेतपत्रं प्रारब्धवान्। श्वेतपत्रमिदम्, विभिन्न-क्षेत्राणां संस्थानां कृते स्वस्य क्वाण्टमसुरक्षितप्रवासं आरब्धुम्, क्वाण्टम-सज्जतायै च बहुमूल्यं मार्गदर्शकं करोति।

## जम्मू-कश्मीर

जम्मू-कश्मीरे राज्य-अन्वेषण-सम्भागेन आतङ्कवाद-वित्तपोषण-अन्वेषणस्य भागरूपेण जम्मू, डोडा, हण्डवाड़ा इत्यादिषु त्रयेषु स्थानेषु अन्वेषणाभियानं कृतम्। क्रिप्टोमुद्रायाः माध्यमेन सीमापारं वित्तपोषणं कृत्वा, आतङ्कवादस्य प्रेरणायाः अथ, शान्तेः अस्थिरता-प्रयत्नानां च षड्यंत्रं लक्ष्यीकृत्य, अन्वेषणमिदं कृतम् ।

## अफगानिस्तान-शरणार्थी

ह्यः एकस्मिन् दिने एव पञ्चसहस्राधिकाः शरणार्थी-परिवाराः स्वदेशं अफगानिस्तानं प्रति प्रत्यागतवन्तः। प्रत्यागतेषु अधिकांशाः परिवाराः इरान्-देशे निवसन्तः आसन् । शरणार्थीनां विशालपरिमाणेन पुनर्गमनं निरन्तरं जायमानं वर्तते। तेहरानेन इरान्देशे अवैधरूपेण निवसन्तः अफगानिस्तानदेशस्य नागरिकाः देश-त्यागार्थम् आग्रहिताः। अद्यतनवक्तव्ये अफगानिस्तानस्य आन्तरिम-प्रधानमन्त्री-कार्यालयेन विगत-चतुर्दशकेषु अफगानिस्तानस्य शरणार्थीनां आतिथ्यार्थम् इरान-देशाय कृतज्ञता समर्पिता । एवमेव शरणार्थीनाम् अधिकारस्य निरन्तरं सम्मानं कर्तुं आह्वानमपि कृतम्। अवधेयं वर्तते यत् विगतमासे अर्धलक्षाधिकाः अफगानिस्तानशरणार्थिनः इरान्देशात् स्वदेशं प्रत्यागताः सन्ति ।

## गुजरात-सेतु-दुःखदम्

गुजरातस्य स्वास्थ्यमन्त्री ऋषिकेश-पटेलः अवदत् यत् सर्वकारेण वडोदरा-सेतु-घटनायाः उच्चस्तरीयान्वेषणं कृतं वर्तते । अन्वेषणसमित्याः प्रारम्भिक-प्रतिवेदनानुसारं पथिकानां आर्टिक्युलेशन-क्रश इत्यस्य च कारणेन मुजपुर-गम्भीरा-सेतुः पतितः। अद्य श्रीपटेलेन वडोदरामण्डलस्य पादरा-तालुकायाः मुजपुरे गम्भीरनद्याः सेतुघटनास्थलस्य भ्रमणकाले एतत् उक्तम्। समितिः त्रिंशत् दिवसाभ्यन्तरे विस्तृतं प्रतिवेदनं प्रस्तौति इत्यपि सः उल्लेखितवान् ।

-

-

## भारतस्य ऋतु-विज्ञान-विभागः

भारतस्य ऋतु-विज्ञान-विभागेन अद्य पूर्वीय-राजस्थानस्य, उत्तरप्रदेशस्य मध्यप्रदेशस्य च पृथक् पृथक् स्थानेषु प्रचण्डवृष्टेः पूर्वानुमानं प्रकटितम्। विभागस्य अनुसारम् अद्य अरुणाचलप्रदेशे, छत्तीसगढे, हरियाणायां, चण्डीगढे, हिमाचलप्रदेशे, झारखण्डे, पञ्जाबराज्ये, उत्तराखण्डे, विदर्भे च प्रचण्डवृष्टिः भवितुं शक्नोति। ऋतुविभागेन आगामिषु सप्त-दिवसेषु देशस्य पूर्वोत्तर, पश्चिम, पूर्व, मध्यभागेषु च लघुतः मध्यमपर्यन्तं वर्षायाः स्थितेः पूर्वानुमानं प्रकटितमस्ति।

**भारत-इङ्गलैण्ड-टेस्ट-क्रिकेट**

टेस्ट्-क्रिकेट्-क्रीडायां एण्डरसन्-तेण्डुलकर-ट्राफीति क्रीडास्पर्धायाः तृतीया टेस्ट्-क्रीडा भारत-इङ्ग्लैण्ड्योः मध्ये लण्दनस्य लॉर्डस्क्रीडाङ्गणे प्रचलति । अन्तिमसूचना प्राप्तिं यावत् इंग्लैण्ड् दलेन द्वितीय दिवसस्य भोजनावकाशं यावत् सप्त क्रीडकानां हानौ त्रिपञ्चाशदधिक-त्रिशतं धवनांकाः समर्जिताः।

।।इति वार्ता।।